# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**- आचार्यद्वितीयवर्षम् (SEM-3) | **प्रश्नपत्रम्** - ४ (New) | **गुणा:** - ७० |
| **विषय:** - नव्यव्याकरणम् | **कोड- CC - 5.3.9** | **समय:** - १० त: १ |
| **दिनाङ्क:** - ०७/१२/२०१८ | **सन्दर्भग्रन्थ:**- वाक्यपदीयम् ब्रह्मकाण्डम् | |

**॥ प्रथमान्विति: ॥**

**प्र-१ निम्नलिखितयो: एकस्या: कारिकाया: सप्रसङ्गं व्याख्या कार्या ।** ०५

१. अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् । विवर्ततेऽर्थभावेन प्रक्रिया जगतो यत: ॥

२. एकस्य सर्वबीजस्य यस्य चेयमनेकधा । भोक्तृ-भोक्तव्य-रूपेण भोगरूपेण च स्थिति: ॥

**प्र-२ निम्नलिखितासु कारिकाद्वयं सप्रसङ्गं व्याख्येयम् ।** १०

१. प्राप्त्युपायोऽनुकारश्च तस्य वेदो महर्षिभि: ।
एकोऽप्यनेकवर्त्मेव समाम्नात: पृथक् पृथक् ॥

२. सत्या विशुद्धिस्तत्रोक्ता विद्यैवैकपदागमा ।
युक्ता प्रणवरूपेण सर्ववादाविरोधिना ॥

३. तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।
पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते ॥

४. यत्र वाचो निमित्तानि चिह्नानीवाक्षरस्मृते: ।
शब्दपूर्वेण योगेन भासन्ते प्रतिबिम्बवत् ॥

**॥ द्वितीयान्विति: ॥**

**प्र-३ निम्नलिखितयो: एकस्या: कारिकाया: सप्रसङ्गं व्याख्या कार्या ।** ०५

१. नित्या: शब्दार्थसम्बन्धा: समाम्नाता महर्षिभि: । सूत्राणां सानुतन्त्राणां भाष्याणां च प्रणेतृभि: ॥

२. नित्यत्वे कृतकत्वे वा तेषामादिर्न विद्यते । प्राणिनामिव सा चैषा व्यवस्थानित्यतोच्यते ॥

**प्र-४ निम्नलिखितासु कारिकाद्वयं सप्रसङ्गं व्याख्येयम् ।** १०

१. निर्ज्ञातशक्तेर्द्रव्यस्य तां तामर्थक्रियां प्रति ।
विशिष्टद्रव्यसम्बन्धे सा शक्ति: प्रतिबध्यते ॥

२. यत्नेनानुमितोऽप्यर्थ: कुशलैरनुमातृभि: ।
अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते ॥

३. परेषामसमाख्येयमभ्यासादेव जायते ।
मणिरूप्यादिविज्ञानं तद्विदां नानुमानिकम् ॥

४. यो यस्य स्वमिव ज्ञानं दर्शनं नातिशङ्कते ।
स्थितं प्रत्यक्षपक्षे तं कथमन्यो निवर्तयेत् ॥

**॥ तृतीयान्विति: ॥**

**प्र-५ निम्नलिखितयो: एकस्या: कारिकाया: सप्रसङ्गं व्याख्या कार्या ।** ०५

१. हस्तस्पर्शादिवान्धेन विषमे पथि धावता । अनुमानप्रधानेन विनिपातो न दुर्लभ: ॥

२. तस्मादकृतकं शास्त्रं स्मृतिं च सनिबन्धनाम् । आश्रित्यारभ्यते शिष्टै: शब्दानामनुशासनम् ॥

प्र-६ **निम्नलिखितासु कारिकाद्वयं सप्रसङ्गं व्याख्येयम् ।** **१०**

१. द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः ।
एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते ॥

२. अरणिस्थं यथा ज्योतिः प्रकाशान्तरकारणम् ।
तद्वच्छब्दोऽपि बुद्धिस्थः श्रुतीनां कारणं पृथक् ॥

३. नादस्य क्रमजन्मत्वान्न पूर्वो न परश्च सः ।
अक्रमः क्रमरूपेण भेदवानिव जायते ॥

४. प्रतिबिम्बं यथान्यत्र स्थितं तोयक्रियावशात् ।
तत्प्रवृत्तिमिवान्वेति स धर्मः स्फोटनादयोः ॥

**॥ चतुर्थान्वितिः ॥**

प्र-७ **निम्नलिखितयोः एकस्याः कारिकायाः सप्रसङ्गं व्याख्या कार्या ।** **०५**

१. अतोऽनिर्ज्ञातरूपत्वात् किमाहेत्यभिधीयते । नेन्द्रियाणां प्रकाश्येऽर्थे स्वरूपं गृह्यते तथा ॥

२. भेदेनावगृहीतौ द्वौ शब्दधर्मावपोद्धृतौ ।भेदकार्येषु हेतुत्वमविरोधेन गच्छतः ॥

प्र-८ **निम्नलिखितासु कारिकाद्वयं सप्रसङ्गं व्याख्येयम् ।** **१०**

१. उच्चरन् परतन्त्रत्वाद् गुणः कार्यैर्न युज्यते ।
तस्मात्तदर्थे कार्याणां सम्बन्धः परिकल्प्यते ॥

२. गुणः प्रकर्षहेतुर्यः स्वातन्त्र्येणोपदिश्यते ।
तस्याश्रिताद् गुणादेव प्रकृष्टत्वं प्रतीयते ॥

३. स्वं रूपमिति कैश्चित्तु व्यक्तिः संज्ञोपदिश्यते ।
जातेः कार्याणि संसृष्टा जातिस्तु प्रतिपद्यते ॥

४. पदे न वर्णा विद्यन्ते वर्णेष्ववयवा इव ।
वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन ॥

प्र-९ **निम्नलिखितेषु केषाञ्चित् दशानां प्रश्नानां लघूत्तरं लेख्यम् ।** **१०**

१ जगतः प्रक्रिया कथं विवर्तते ?
२ कति विकाराः सन्ति ?
३ छन्दसां प्रथमम् अङ्गं किम् ?
४ शब्दानां तत्त्वावबोधः कस्माद् ऋते नास्ति ?
५ शब्दार्थसम्बन्धाः कथं सन्ति ?
६ शब्दः कतिविधः ?
७ साधवः शब्दाः कुत्र साधनं भवन्ति ?
८ ऋषीणामपि ज्ञानं कथं वर्तते ?
९ अनुमानप्रधानस्य कृते को दुर्लभो नास्ति ?
१० अरणिस्थः ज्योतिः कस्य कारणम् ?
११ अक्रमः क्रमरूपेण कः स्थितो वर्तते ?
१२ पौर्वापर्यरहितः कः ?
१३ पदे भेदेऽपि केषाम् एकत्वं न निवर्तते ?
१४ वर्णातिरिक्तं किं नास्ति ?
१५ वर्णपदाभ्यां व्यतिरिक्तं किं नास्ति ?